# grahadhyAnam

# ગ્રહધ્યાનમ્

## Document Information

Text title : grahadhyAnam

File name : grahadhyAnam.itx

Category : navagraha, dhyAnam

Location : doc_z_misc_navagraha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગ્રહધ્યાનમ્

ચન્દ્રધ્યાનમ્ ।
કર્પૂરસ્ફટિકાવદાતમનિશં પૂર્ણેન્દુબિમ્બાનનં
મુક્તાદામવિભૂષિતેન વપુષા નિર્મૂલયન્તં તમઃ ।
હસ્તાભ્યાં કુમુદં વરં ચ દધતં નીલાલકોદ્ભાસિતં
સ્વસ્યાઙ્કસ્થમૃગોદિતાશ્રયગુણં સોમં સુધાબ્ધિં ભજે ॥

કુજધ્યાનમ્ ।
વિન્ધ્યેશં  ગ્રહદક્ષિણપ્રતિમુખં રક્તત્રિકોણાકૃતિં
દોર્ભિઃ સ્વીકૃતશક્તિશૂલસગદં ચારૂઢમેષાધિપમ્ ।
ભારદ્વાજમુપાત્તરક્તવસનચ્છત્રશ્રિયા શોભિતં
મેરોર્દિવ્યગિરેઃ પ્રદક્ષિણકરં સેવામહે તં કુજમ્ ॥

બુધધ્યાનમ્ ।
આત્રેયં મહદાધિપં ગ્રહગણસ્યેશાનભાગસ્થિતં
બાણાકારમુદઙ્મુખં શરલસત્તૂણીરબાણાસનમ્ ।
પીતસ્રગ્વસનદ્વયધ્વજરથચ્છત્રશ્રિયા શોભિતં
મેરોર્દિવ્યગિરેઃ પ્રદક્ષિણકરં સેવામહે તં બુધમ્ ॥

ગુરુધ્યાનમ્ ।
રત્નાષ્ટાપદવસ્ત્રરાશિમમલં દક્ષાત્કિરન્તં કરા-
દાસીનં વિપણૌ કરં નિદધતં રત્નાદિરાશૌ પરમ્ ।
પીતાલેપનપુષ્પવસ્ત્રમખિલાલઙ્કારસમ્ભૂષિતં
વિદ્યાસાગરપારગં સુરગુરું વન્દે સુવર્ણપ્રભમ્ ॥

શુક્રધ્યાનમ્ ।
શ્વેતામ્ભોજનિષણ્ણમાપણતટે શ્વેતામ્બરાલેપનં
નિત્યં ભક્તજનાયસમ્પ્રદદતં વાસો મણીન્ હાટકમ્ ।
વામેનૈવ કરેણ દક્ષિણકરે વ્યાખ્યાનમુદ્રાઙ્કિતં

શુક્રં દૈત્યવરાર્ચિતં સ્મિતમુખં વન્દે સિતાઙ્ગપ્રભમ્ ॥

શનીશ્વરધ્યાનમ્ ।
ધ્યાયેન્નીલશિલોચ્ચયદ્યુતિનિભં નીલારવિન્દાસનં
દેવં દીપ્તવિશાલલોચનયુતં નિત્યક્ષુધાકોપિનમ્ ।
નિર્માંસોદરશુષ્કદીર્ઘવપુષં રૌદ્રાકૃતિં ભીષણં
દીર્ઘસ્મશ્રુજટાયુતં ગ્રહપતિં સૌરં સદાહં ભજે ॥

Proofread by PSA Easwaran

*grahadhyAnam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*